## || श्रीऋणमोचनमहागणपतिस्तोत्रम् ||

( संशोधित –"स्वामी रुपेश्वरानंद" द्वारा)

विनियोग :

**श्रीऋणमोचनमहागणपतिस्तोत्रस्य शुक्राचार्य ऋषिः, अनुष्टुप्छन्दः, श्रीऋणमोचक महागणपतिः देवता , मम परिवारस्य दारिद्र्य निवारणार्थे ऋण मुक्ति हेतवे च श्री ऋणमोचन महागणपति देवता कृपाप्रसादसिद्ध्यर्थे च पाठे विनियोगः ॥**

**ध्यानम्:**

रक्ताङ्गं रक्तवस्त्रं सितकुसुमगणैः पूजितं रक्तगन्धैः

क्षीराब्धौ रत्नपीठे सुरतरुविमले रत्नसिंहासनस्थम् ।

दोर्भिः पाशाङ्कुशेष्टाभयधरमतुलं चन्द्रमौलिं त्रिणेत्रं

ध्यायेत् शान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥

**स्तोत्र पाठ आरंभ :**

**स्मरामि देव देवेशं वक्रतुण्डं महाबलम् ।**

**षडक्षरं कृपासिन्धुं नमामि ऋणमुक्तये ॥ १ ॥**

**एकाक्षरं ह्येकदन्तम् एक ब्रह्म सनातनम् ।**

**एकमेवाद्वितीयं च नमामि ऋणमुक्तये ॥ २ ॥**

**महागणपतिं देवं महासत्वं महाबलम् ।**

**महाविघ्नहरं शम्भोः नमामि ऋणमुक्तये ॥ ३ ॥**

**कृष्णाम्बरं कृष्णवर्णं कृष्णगन्धानुलेपनम् ।**

**कृष्णसर्पोपवीतं च नमामि ऋणमुक्तये ॥ ४ ॥**

**रक्ताम्बरं रक्तवर्णं रक्तगन्धानुलेपनम् ।**

**रक्तपुष्पप्रियं देवं नमामि ऋणमुक्तये ॥ ५ ॥**

**पीताम्बरं पीतवर्णं पीतगन्धानुलेपनम् ।**

**पीतपुष्पप्रियं देवं नमामि ऋणमुक्तये ॥ ६ ॥**

**धूम्राम्बरं धूम्रवर्णं धूम्रगन्धानुलेपनम् ।**

**होम धूमप्रियं देवं नमामि ऋणमुक्तये ॥ ७ ॥**

**फालनेत्रं फालचन्द्रं पाशाङ्कुशधरं विभुम् ।**

**चामरालङ्कृतं देवं नमामि ऋणमुक्तये ॥ ८ ॥**

## फलश्रुति :

इदं त्वृणहरं स्तोत्रं सन्ध्यायां यः पठेन्नरः ।

षण्मासाभ्यन्तरेणैव ऋणमुक्तो भविष्यति ॥ ९ ॥

इति श्रीऋणमोचनमहागणपतिस्तोत्रं सम्पूर्णम् ।

**सिद्धि विधान :**

- सिद्ध मुहूर्त में १९०० पाठ कर सिद्ध करें !
- सिद्ध करने पर ऋण मुक्ति हेतु प्रतिदिन 40 पाठ 30 दिन तक करें ! अथवा नित्य 11 पाठ छः माह तक करें ! भोग में लड्डू रखें ! पाठ के बाद बच्चों को लड्डू खिला दें !
- दूकान में आय हेतु में ११ पाठ से जल अभिमंत्रित कर दूकान में छिड़कें !

**सावधानी** - आहार विहार, आचार विचार सात्विक रखें !

अधिक जानकारी के लिए चैनल देखें

:https://www.youtube.com/c/SwamiRupeshwaranand

**Swami Rupeshwaranand website link:** https://swamirupeshwaranand.in/

स्वामी रुपेश्वरानंद आश्रम Whatsapp सेवा No.: +91- 7607233230